

# ॥ श्रीसरस्वतीद्वादशनामस्तोत्रम् ॥

सरस्वतीमहं वन्देवीणापुस्तकधारिणीम् ।
हंसवाहसमायुक्तांविद्यादानकरीं मम ॥ १॥

प्रथमं भारती नामद्वितीयं च सरस्वती ।
तृतीयं शारदा देवीचतुर्थं हंसवाहिनी ॥ २॥

पञ्चमं जगति ख्याताषष्ठं वाणीश्वरी तथा ।
कौमारी सप्तमं प्रोक्ताअष्टमं ब्रह्मचारिणी ॥ ३॥

नवमं बुद्धिदात्री च दशमं वरदायिनी ।
एकादशं क्षुद्रघण्टा द्वादशं भुवनेश्वरी ॥ ४॥

ब्राह्मी द्वादशनामानि त्रिसन्ध्यं यः पठेन्नरः ।
सर्वसिद्धिकरी तस्य प्रसन्ना परमेश्वरी ।
सा मे वसतु जिह्वाग्रे ब्रह्मरूपा सरस्वती ॥ ५॥

॥ इति सरस्वतीद्वादशनामस्तोत्रं सम्पूर्णम् ॥

वैदिक जीवन™
Sanatan Online Store
www.vaidikjeevn.com

Ver 1.0.0

7706011555
www.vaidikjeevn.com